# শ্রীহযগ্রীবস্তোত্রম্

{॥ শ্রীহযগ্রীবস্তোত্রম্ ॥}

শ্রিঃ

শ্রীমান্ বেঙ্কটনাথার্যঃ কবিতার্কিককেসরী ।

বেদান্তাচার্যবর্যো মে সন্নিধত্তাং সদা হৃদি ॥

জ্ঞানানন্দমযং দেবং নির্মলস্ফটিকাকৃতিম্ ।

আধারং সর্ববিদ্যানাং হযগ্রীবমুপাস্মহে ॥ ১॥

স্বতঃ সিদ্ধং শুদ্ধস্ফটিকমণি ভূভৃৎপ্রতিভটং

সুধাসধ্রীচীভির্দ্যুতিভিরবদাতত্রিভুবনম্ ।

অনন্তৈস্ত্রয্যন্তৈরনুবিহিত হেষাহলহলং

হতাশেষাবদ্যং হযবদনমীডীমহি মহঃ ॥ ২॥

সমাহারঃ সাম্নাং প্রতিপদমৃচাং ধাম যজুষাং

লযঃ প্রত্যূহানাং লহরি বিততির্বোধজলধেঃ ।

কথাদর্পক্ষুভ্যৎকথককুল কোলাহলভবং

হরত্বন্তর্ধ্বান্তং হযবদন হেষা হলহলঃ ॥ ৩॥

প্রাচী সন্ধ্যা কাচিদন্তর্নিশাযাঃ

প্রজ্ঞাদৃষ্টেরঞ্জনশ্রীরপূর্বা ।

বক্ত্রী বেদান্ ভাতু মে বাজিবক্ত্রা
বাগীশাখ্যা বাসুদেবস্য মূর্তিঃ ॥ ৪॥

বিশুদ্ধ বিজ্ঞান ঘন স্বরূপং
বিজ্ঞান বিশ্রাণন বদ্ধদীক্ষম্ ।
দযানিধিং দেহভৃতাং শরণ্যং
দেবম্ হযগ্রীবমহং প্রপদ্যে ॥ ৫॥

অপৌরুষেযৈরপি বাক্প্রপঞ্চৈঃ
অদ্যাপি তে ভূতিমদৃষ্টপারাম্ ।
স্তুবন্নহং মুগ্ধ ইতি ত্বযৈব
কারুণ্যতো নাথ কটাক্ষণীযঃ ॥ ৬॥

দাক্ষিণ্যরম্যা গিরিশস্য মূর্তিঃ
দেবী সরোজাসন ধর্মপত্নী ।
ব্যাসাদযোঽপি ব্যপদেশ্যবাচঃ
স্ফুরন্তি সর্বে তব শক্তিলেশৈঃ ॥ ৭॥

মন্দোঽভবিষ্যন্নিযতং বিরিঞ্চো
বাচাং নিধে বঞ্চিতভাগধেযঃ ।
দৈত্যাপনীতান্ দযযৈব ভূযোঽপি
অধ্যাপযিষ্যো নিগমান্ ন চেত্ ত্বম্ ॥ ৮॥

বিতর্কডোলাং ব্যবধূয় সত্বে

বৃহস্পতিং বর্তযসে যতস্ত্বম্ ।

তেনৈব দেব ত্রিদশেশ্বরাণাম্

অস্পৃষ্ট ডোলাযিত মাধিরাজ্যম্ ॥ ৯॥

অগ্নৌ সমিদ্ধার্চিষি সপ্ততন্তোঃ

আতস্থিবান্ মন্ত্রমযং শরীরম্ ।

অখণ্ডসারৈর্হবিষাং প্রদানৈঃ

আপ্যাযনং ব্যোমসদাং বিধৎসে ॥ ১০॥

যন্মূলমীদৃক্ প্রতিভাতি তত্বং

যা মূলমাম্নায মহাদ্রুমাণাম্ ।

তত্বেন জানন্তি বিশুদ্ধ সত্বাঃ

তামক্ষরা মক্ষরমাতৃকাং ত্বাম্ ॥ ১১॥

অব্যাকৃতাদ্ ব্যাকৃতবানসি ত্বম্

নামানি রূপাণি চ যানি পূর্বম্ ।

শংসন্তি তেষাং চরমাং প্রতিষ্ঠাং

বাগীশ্বর ত্বাং ত্বদুপজ্ঞবাচঃ ॥ ১২॥

মুগ্ধেন্দু নিষ্যন্দ বিলোভনীযাং

মূর্তিং তবানন্দ সুধা প্রসূতিম্ ।

বিপশ্চিতশ্চেতসি ভাবযন্তে

বেলামুদারামিব দুগ্ধসিন্ধোঃ ॥ ১৩॥

মনোগতং পশ্যতি যঃ সদা ত্বাং

মনীষিনাং মানস রাজহংসম্ ।

স্বযম্ পুরোভাব বিবাদভাজঃ

কিংকুর্বতে তস্য গিরো যথার্হম্ ॥ ১৪॥

অপি ক্ষণার্ধং কলযন্তি যে ত্বাম্

আপ্লাবযন্তং বিশদৈর্মযূখৈঃ ।

বাচাং প্রবাহৈরনিবারিতৈস্তে

মন্দাকিনীং মন্দযিতুং ক্ষমন্তে ॥ ১৫॥

স্বামিন্ ভবদ্ধ্যান সুধাভিষেকাত্

বহন্তি ধন্যাঃ পুলকানুবন্ধম্ ।

অলক্ষিতে ক্বাপি নিরূঢমূলম্

অঙ্গেষ্বিবানন্দথুং অঙ্কুরন্তম্ ॥ ১৬॥

স্বামিন্ প্রতীচা হৃদযেন ধন্যাঃ

ত্বদ্ধ্যন চন্দ্রোদয বর্ধমানম্ ।

অমান্তমানন্দ পযোধিমন্ত

পযোভিরক্ষ্ণাং পরিবাহযন্তি ॥ ১৭॥

স্বৈরানুভাবাস্ত্বদধীন ভাবাঃ

সমৃদ্ধবীর্যাস্ত্বদনুগ্রহেণ ।

বিপশ্চিতো নাথ তরন্তি মাযাং

বৈহারিকীং মোহন পিঞ্ছিকাং তে ॥ ১৮॥

প্রাঙ্নির্মিতানাং তপসাং বিপাকাঃ

প্রত্যগ্রনিঃশ্রেযস সম্পদো মে ।

সমেধিষীরংস্তব পাদপদ্মে

সংকল্প চিন্তামণযঃ প্রণামাঃ ॥ ১৯॥

বিলুপ্ত মূর্ধন্য লিপি ক্রমাণাম্

সুরেন্দ্র চূডাপদ লালিতানাম্ ।

ত্বদংঘ্রি রাজীব রজঃকণানাম্

ভূযান্ প্রসাদো মযি নাথ ভূযাত্ ॥ ২০॥

পরিস্ফুরন্নূপুর চিত্রভানু-

প্রকাশ নির্ধূত তমোনুষঙ্গাম্ ।

পদদ্বযীং তে পরিচিন্মহে ঽন্তঃ

প্রবোধ রাজীব বিভাত সন্ধ্যাম্ ॥ ২১॥

ত্বৎকিঙ্করালঙ্করণোচিতানাং

ত্বযৈব কল্পান্তর পালিতানাম্ ।

মঞ্জুপ্রণাদং মণিনূপুরং তে

মঞ্জূষিকাং বেদগিরাং প্রতীমঃ ॥ ২২॥

সন্চিন্তযামি প্রতিভাদশাস্থান্

সন্ধুক্ষযন্তং সময প্রদীপান্ ।

বিজ্ঞান কল্পদ্রুম পল্লবাভং

ব্যাখ্যান মুদ্রা মধুরং করং তে ॥ ২৩॥

চিত্তে করোমি স্ফুরিতাক্ষমালং

সব্যেতরং নাথ করং ত্বদীযম্ ।

জ্ঞানামৃতোদঞ্চনলম্পটানাং

লীলাঘটী যন্ত্রমিবাশ্রিতানাম্ ॥ ২৪॥

প্রবোধ সিন্ধোররুণৈঃ প্রকাশৈঃ

প্রবাল সঙ্ঘাতমিবোদ্বহন্তম্ ।

বিভাবযে দেব সপুস্তকং তে

বামং করং দক্ষিণমাশ্রিতানাম্ ॥ ২৫॥

তমাংসি ভিত্ত্বা বিশদৈর্মযূখৈঃ

সম্প্রীণযন্তং বিদুষশ্চকোরান্ ।

নিশামযে ত্বাং নবপুণ্ডরীকে

শরদ্ঘনে চন্দ্রমিব স্ফুরন্তম্ ॥ ২৬॥

দিশন্তু মে দেব সদা ত্বদীযাঃ

দযাতরঙ্গানুচরাঃ কটাক্ষাঃ ।

শ্রোত্রেষু পুম্সামমৃতম্ ক্ষরন্তীং

সরস্বতীং সংশ্রিত কামধেনুম্ ॥ ২৭॥

বিশেষবিৎপারিষদেষু নাথ

বিদগ্ধ গোষ্ঠীসমরাঙ্গণেষু ।

জিগীষতো মে কবিতার্কিকেন্দ্রান্

জিহ্বাগ্র সিংহাসনমভ্যুপেযাঃ ॥ ২৮॥

ত্বাং চিন্তযন্ ত্বন্মযতাং প্রপন্নঃ

ত্বামুদ্গৃণন্ শব্দমযেন ধাম্না ।

স্বামিন্ সমাজেষু সমেধিষীয

স্বচ্ছন্দ বাদাহব বদ্ধশূরঃ ॥ ২৯॥

নানাবিধানামগতিঃ কলানাং

ন চাপি তীর্থেষু কৃতাবতারঃ ।

ধ্রুবং তবানাথপরিগ্রহাযাঃ

নবং নবং পাত্রমহং দযাযাঃ ॥ ৩০॥

অকম্পনীযান্যপনীতি ভেদৈঃ

অলঙ্কৃষীরন্ হৃদযং মদীযম্ ।

শঙ্কাকলঙ্কাপগমোজ্জ্বলানি

তত্ত্বানি সম্যঞ্চি তব প্রসাদাত্ ॥ ৩১॥

ব্যাখ্যা মুদ্রাং করসরসিজৈঃ পুস্তকম্ শঙ্খচক্রে

বিভ্রদ্ভিন্নস্ফটিকরুচিরে পুণ্ডরীকে নিষণ্ণঃ ।

অম্লানশ্রীরমৃতবিশদৈরংশুভিঃ প্লাবযন্ মাং

আবির্ভূযাদনঘ মহিমা মানসে বাগধীশঃ ॥ ৩২ ॥

বাগর্থ সিদ্ধিহেতোঃ

পঠত হযগ্রীবসংস্তুতিং ভক্ত্যা ।

কবিতার্কিককেসরিণা

বেঙ্কটনাথেন বিরচিতামেতাম্ ॥ ৩৩॥

॥ ইতি শ্রীহযগ্রীবস্তোত্রং সমাপ্তম্ ॥

কবিতার্কিকসিংহায কল্যাণগুণশালিনে ।

শ্রীমতে বেঙ্কটেশায বেদান্তগুরবে নমঃ ॥

Encoded and proofread by Sundar Rajan RD sundar.rajanrd at gmail.com

Please send corrections to sanskrit@cheerful.com

Hayagriva Stotram Lyrics in Bengali PDF
% File name : hayagrIvastotramDesika.itx
% Location : doc_deities_misc
% Author : Vedanta Desika
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Sundar Rajan RD sundar.rajanrd at gmail.com
% Proofread by : Sundar Rajan RD sundar.rajanrd at gmail.com
% Latest update : November 23, 2011
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ December 15, 2015 ] at Stotram Website